# श्री ऋणविमोचन नृसिंह स्तोत्रं

**। ध्यानम् ।**

वागीसा यस्य वदने लक्ष्मीर्यस्य च वक्षसि ।
यस्यास्ते ह्रदये संवित् तं नृसिंहमहं भजे ॥

**। अथ स्तोत्रम् ।**

देवता कार्यसिद्ध्यर्थं सभास्तंभसमुद्भवम् ।
श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये ॥ 1

लक्ष्म्यालिंगित वामांगं भक्तानां वरदायकम् ।
श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये ॥ 2

आंत्र मालाधरं शंखचक्राब्जायुध धारिणम् ।
श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये ॥ 3

स्मरणात् सर्वपापघ्नं कद्रूजविषनाशनम् ।
श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये ॥ 4

सिंहनादेन महता दिग्दंतिभयनाशनम् ।
श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये ॥ 5

© 2022 Vedam Nadam

प्रह्लादवरदं श्रीशं दैत्येश्वरविदारिणम् ।
श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये ॥ 6

क्रूरग्रहैः पीडितानां भक्तानामभयप्रदम् ।
श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये ॥ 7

वेदवेदांतयज्ञेशं ब्रह्मरुद्रादि वंदितम् ।
श्रीनृसिंहं महावीरं नमामि ऋणमुक्तये ॥ 8

य इदं पठते नित्यं ऋणमोचन संज्ञितम् ।
अनृणे जायते सत्यो धनं शीघ्रमवाप्नुयात् ॥ 9

सर्वसिद्धिप्रदं नृणां सर्वैश्वर्यप्रदायकं ।
तस्मात् सर्वप्रयत्नेन पठेत् स्तोत्रमिदं सदा ॥ 10

॥ इति श्री नृसिंहपुराणे ऋणविमोचन श्री नृसिंह स्तोत्रं संपूर्णम् ॥

© 2022 Vedam Nadam